# बोर्ड कृतिपत्रिका : मार्च 2018

# संस्कृत - मन्दाकिनी

**समय: 3 होरात्रयम्।** **गुणा: 80**

**सूचना:**

i. सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

ii. यथासूचनं आकलनकृतय: व्याकरणकृतय: आरेखितव्या:।

iii. आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम्।

**प्रथम: विभाग: – गद्यम्।**

**(अवबोधनम्, शब्दसम्पत्ति:, पृथक्करणम्)**

**1.अ. गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।** **[7]**

**अ.1. अवबोधनम्। (केऽपि 2 कृती कुरुत)** **(1)**

i. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।

क. _______ विनायक: मुम्बईस्थिते जे.जे. महाविद्यालयं प्रवेशित:।
(ऑटोरॉथफिल्डमहोदयेन / पित्रा)

ख. सासवणे नाम ग्राम: कोङ्कणप्रदेशे _______अस्ति।
(अलिबागनगरे / रायगडजनपदे)

ii. पूर्णवाक्येन उत्तरं लिखत।
विनायक: केन सह मृत्प्रतिमा निर्मातुं प्रारभत? **(1)**

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।
सासवणेग्राम: प्रकृतिरम्यस्थलम् अस्ति। **(1)**

अस्ति कोङ्कणप्रदेशे रायगडजनपदे कश्चिद् ग्राम: सासवणेनाम। समुद्रं निकषा एवाध्युषितं प्रकृतिरम्यस्थलं ननु। तत्र वर्तते नयनरम्य: चित्ताकर्षक: करमरकरशिल्पालय:। नैतत् केवलं ग्रामभूषणं परं कलावतां तथैव कलारसिकानां कृते पण्ढरपुरमिव तीर्थक्षेत्रम्। ग्रामेऽस्मिन् पाण्डुरङ्गकरमरकरनाम्न: कृषीवलस्य सङ्गीत-चित्र-कलादिभि: परिपूर्णं, शान्तिसुखयो: निधानमिव गृहमासीत्। तत्र एकनवाष्टैकतमे ख्रिस्ताब्दे (१८९१) ऑक्टोबरमासस्य द्वितीये दिने पुत्रजन्मोत्सव: सम्पन्न: जात:। एष: विनायक: नाम बाल: बाल्य एव पित्रासह मृत्प्रतिमा: निमार्तुं प्रारभत। विविध-प्राणिनां देवतानां च प्रतिमा निर्माणे तस्यासीद् रुचि:। पुस्तकस्थानां विविधचित्राणां पुनर्विलेखनेऽपि स मग्न आसीत्। सततं निरीक्षमाणेन तस्य पित्राऽपि तस्मिन् समुचितसंस्कारा: समारोपिता:
एकदा ग्रामस्थराममन्दिरेऽनेन छत्रपति शिवरायस्य चित्रं विलेखितम्। तस्मिन् समये अलिबागमण्डलाधिकारी ऑटोरॉथफिल्डमहोदय: ग्रामस्य व्यवस्थापन-निरीक्षणार्थमागत:। दृष्टमात्रे तस्मिन् चित्रे तन्मन: प्रहृष्टम्। अतस्तेन विनायक: मुम्बईस्थिते जे.जे.महाविद्यालयं प्रवेशित:। तत्रापि स्वप्रतिभया कौशल्येन च विनायकेन प्रथम: क्रमाङ्क: प्राप्त:।

**अ.2. शब्दज्ञानम्। (का: अपि 3 कृती: कुरुत।)**

i. पूर्वपदं लिखत: **(1)**

क. नैतत् = _______ + एतत्।

ख. अतस्तेन = _______ + तेन।

ii. समूहेतरं पदं चिनुत। **(1)**

1. मग्न:, स्थित:, रत:।
2. समुद्र:, रत्नाकर:, दिवाकर:।

iii. चतुर्थ पदं लिखत। **(1)**
नयनरम्य: शिल्पालय: :: प्रथम: : _______

iv. गद्यांशे आगते द्वे तृतीयान्तपदे लिखत। **(1)**

**अ.3. स्वमत-अभिव्यक्तिः।** **(2)**

'जीवने कलायाः महत्त्वम्' इति विषये ३०/४० शब्दैः माध्यमभाषया लिखत।

**ब. गद्यांश पठित्वा निर्दिष्टाः कृतीः कुरुत।** **[7]**

**ब.1. अवबोधनम्।** **(केऽपि 2 कृती कुरुत)** **(1)**

i. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

सर्वे ग्रामवासिनः चकिता लज्जिताश्चाभवन् यतः _______

१. लेरिसया महोदयं कशाघातैः व्रणितं कृतवन्तः।

२. लेरसिया आत्मनः सत्यरूपं प्रकटीकृतवान्।

ii. कः कं वदति। **(1)**

"भद्र, वयं तु अधनाः।"

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत। **(1)**

चिरादेव लेरसियामहोदयस्य आगमनस्य वार्ता ग्रामे प्रसृता।

तस्मिन् जनस्थाने द्वौ भ्रातरौ न्यवसताम् यावतीव अधनौ परं मनसोदारी करुणापरौ च। ताभ्यां ज्ञातं यद् ग्रामे एकोऽभद्ररूपः कश्चिज्जनो जीर्णवस्त्राधानः क्षुत्पीडितः स्थितः। न कश्चन तेन सह वार्तामपि करोतीति। तयोरेकस्तस्य समीपं गत्वाऽवदत्, "भद्र, वयं तु अधनाः। अस्माकमेतावदपि धनं नास्ति यद् वयं भोजनार्थं किमपि भवते समर्पयामः। तथापि वयमिच्छामो यद् भवानस्माकं जीर्णकुटीमागच्छतु प्रज्वलिताग्नेरुष्णतां चानुभवतु। यत् लिमप्यस्मत्सविधे विद्यते तदास्वादयतु।"

तथेत्युक्त्वा लेरसिया ताभ्यां भ्रातृभ्यां सह कुटीं गत्वा ताभ्यां सह मोदमानः रात्रिमयापयत्। ताभ्यां साकं रुक्षमन्नमपि तेन सानन्दं भक्षितम्। प्रत्युषसि तेनात्मनः सत्यरूपं प्रकटीकृत्य आत्मपरिचयस्तयोः कारितः। अचिरादेवैषा वार्ता ग्रामे प्रसृता। सर्वे ग्रामवासिनः चकिता लज्जिताश्चाभवन्। एष महाजनो ग्रामगतोऽपि नास्माभिर्विज्ञातः तेन सह शिष्टसम्मतो वा मानुषः आचारोऽवि न कृतः इति विचारेण ते खिन्ना जाताः। केचन धनिकासं जनप्रमुखं स्वगृहं नेतुं तां कुटीमधावन्। परं तौ त्यक्त्वा स नान्यत्र गतः। तावेव मम मित्रे इति सोऽकथयत्। मम परिचयोऽपि नासीत् तयोः परं मम दैन्यावस्थां वीक्ष्यापि ताभ्यां मह्यं सत्कारः प्रतिपादितः। तौ अधनौ किन्तु तयोः मनसी उदारे। एषैव तयोः आत्मिकी सम्पद्।

**ब.2. शब्दज्ञानम्।** **(काः अपि 3 कृतीः कुरुत।)**

i. सन्धिविग्रहं कुरुत। **(1)**

अस्माकमेतावदपि = _______ + _______ + अपि।

ii. गद्यांशतः पर्यायशब्दं लिखत। **(1)**

1. वित्तम् = _______ । 2. समीपे = _______ ।

iii. मञ्जूषातः उचितं विशेषणं चित्वा मेलनं कुरुत। **(1)**

| विशेषणम् | विशेष्यम् |
|---|---|
| _______ | भ्रातरौ |
| _______ | आचारः। |

(जीर्णवस्त्राधानः, रूक्षं, द्वौ, शिष्टसम्मतः)

iv. गद्यांशे आगते द्वे पूर्वकालवाचक धातुसाधित त्वान्त अव्यये लिखत। **(1)**

क. _______ । ख. _______ ।

**ब.3. पृथक्करणम्।** **(2)**

यथाक्रमं घटना लिखत।

i. लेरसिया आत्मनः सत्यरूपं प्रकटीकृतवान्।

ii. लेरसिया भ्रातृभ्यांसह कुटीं गतवान्

iii. सर्वे ग्रामवासिनः चकिता लज्जिताश्चाभवन्

iv. लेरसिया रूक्षमन्नमपि सानन्दं भक्षितवान्।

**क. संवादांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **[7]**

**क.1. अवबोधनम्। (केऽपि 2 कृती कुरुत।)**

i. उचितं कारणं चित्वा वाक्यं पुनर्लिखत। **(1)**

अदितिः आचार्यायाः दर्शनार्थम् आगता।

यतः _______ ।

क. सा राज्यनाट्यस्पर्धायाः कृते आचार्यां निमन्त्रयितुम् ऐच्छत्।

ख. सा नाट्यविषयिणी जिज्ञासां पूरयितुम् ऐच्छत्।

ii. पूर्णवाक्येन उत्तरं लिखत। **(1)**

अदितेः शालया राज्यनाट्यस्पर्धायाः कृते किं सुनिश्चितम्?

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।

प्रायः ख्रिस्तपूर्व चतुर्थशतके भरतमुनिना नाट्यशास्त्रं विरचितम्। **(1)**

**(अभिनयं कर्तुमुत्सुका छात्रा अध्यापिकां प्रति गत्वा पृच्छति)**

अदितिः – आचार्ये,नमो नमः। नाट्यविषयिणी जिज्ञासा भवत्याः दर्शनार्थं मां प्रेरयति।

आचार्या – किं कारणं ते जिज्ञासायाः?

अदितिः – अस्माकं शालया राज्यनाट्यस्पर्धायाः कृते संस्कृतनाट्यस्य प्रयोगः करणीयः इति सुनिश्चितम्। झाशीराज्ञी लक्ष्मीबाई मया अभिनेतव्या। वीररसप्रधानमेतन्नाटकमिति दिग्दर्शकेन कथितम्। भरतमुनिविरचितं नाट्यशास्त्रं नाट्यरसान् च भवती जानाति। अतः तद्विषये प्रष्टुमहमागता।

आचार्या – शृणु। प्रायः ख्रिस्तपूर्व तृतीयशतके भरतमुनिना नाट्यशास्त्रं विरचितम्। एतन्नाट्यशास्त्रं नाम पञ्चमो वेद इति मन्यते बुधैः। तस्मिन् ग्रन्थे नााट्योपयुक्तानां रसानां विषये तेषां भावविषयेऽपि मुनिना कथितमस्ति।

अदितिः – के नाम रसाः भावाश्च? नाट्येषु रसाभिव्यक्तिः कथं संभवति?

आचार्या – भरतमुनिः कथयति यथा महानसे षड्रसैयुक्तं समुचितपाकक्रियाभिः सिद्धं भोजनमास्वाद्यं भवति; नाट्ये तथैव विविधभावैयुक्ता अभिनयसहिता कलाकृतिः रसिकजनानां कृते आस्वादनीया मनोहारिणी च भवति। तस्मादेते विशेषभावाः नाट्यरसाः इति व्याख्याताः।

**क.2. शब्दज्ञानम्। (काः अपि 3 कृतीः कुरुत।)**

i. चतुर्थपदं लिखत। **(1)**

भावविषयेऽपि = भावविषये + अपि। : : कथितमस्ति = _______ + _______।

ii. संवादांशतः पर्यायपदं चिनुत। **(1)**

क. विद्यालयः = _______।

ख. पाकशाला = _______।

iii. गद्यांशतः 'भोजनम्' इति शब्दस्य विशेषणद्वयं लिखत। **(1)**


_______ युक्तम्, _______ सिद्धम्।

iv. संवादांशे आगते सप्तम्यन्तपदे लिखतः

१. _______। २. _______। **(1)**

**क.3. पृथक्करणम्।**

जालरेखाचित्रं लिखत। **(2)**




**द्वितीयः विभागः – पद्यम्।**

**(पृथक्करणं, स्पष्टीकरणं, शब्दसम्पत्तिः, अन्वयपूर्तिः, स्मरणं, वृत्तज्ञानम्।)**

**2.अ. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**अ- 1.पृथक्करणम्।**

मञ्जूषातः शब्दान् चित्वा उचित स्तम्भे लिखत। **(2)**

| शक्यम् | अशक्यम् |
|---|---|
| | |
| | |

(मञ्जूषाः अध्ययनेन विद्ध्याप्राप्तिः, अनक्षरः लिपिन्यासः, विद्यायुक्तं तपः, शशविषाणेच्छा )

तच्छ्रुत्वा तमुवाचैवं शक्रोऽथ द्विजरूपधृक्।
यद्देवं वेत्सि तद् विद्द्यां विना पाठं विना श्रुतम् ।।१।।
कस्माद् व्रतोपवासादिभिस्त्वं साधयितुमुद्दतः।
इयं शशविषाणेच्छा व्योम्नि वा चित्रकल्पना ।।२।।
अनक्षरो लिपिन्यासो यद् विद्याध्ययनं विना ।
एवं यदि भवेदेतन्नह्यधीयीत कश्चन ।।३।।
इत्युक्तः स तपोदत्तः शक्रेण द्विजरूपिणा।
विचार्य विद्यां तत् प्राप्तुं तपस्त्यक्त्वा गृहं ययौ।।४।।

**अ-2. स्पष्टीकरणम्।**

'व्योम्नि चित्रकल्पना' अस्याः कल्पनायाः 30/40 शब्दै स्पष्टीकरणं माध्यमभाषया लिखत। **(2)**

**ब. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

धर्मः सर्वसुखाकरो हितकरो धर्म बुधश्चिन्वते
धर्मेणैव समाप्यते शिवसुखं धर्माय तस्मै नमः।
धर्मान्नास्त्यपरः सुहद् भवभृतां धर्मस्य मूलं दया
धर्मे चित्तमहं दधे प्रतिदिनं हे धर्म मां पालय।।१।।
समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः।।२।।

**ब.1. शब्दज्ञानम्।**

i. विलोमशब्दं लिखत। **(1)**

- बुधा × ________।
- सुहद् × ________। **(1)**

ii. द्वे विशेषणे लिखत।

- धर्म: ________; ________।

**ब. 2. पद्यांशं पठित्वा रिक्तस्थानानि पूरयित्वा द्वितीय श्लोकस्य अन्वयं पुनर्लिखत।** **(2)**

अन्वयम् - (हे) कुटज, ________ समुपागतवति ________ अवहेलां मा गा: ________ (मधुकर:) मकरन्दतुन्दिलानाम् अरविन्दानां ________(अस्ति)।।

**क. अधोदत्तेषु सुभाषितेषु द्वे सुभाषिते शुद्धे पूर्णे च लिखत।** **(4)**

१. गजाननं ________ पादपङ्कजम्।।
२. धृति: ________ श्रिय:।।
३. गृह्णन्तु सर्वे ________एव सिन्धु:।।

**ड. वृत्तनाम चिनुत।** **(1)**

वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुष:।
न हि तुम्बीफल विकलो वीणादण्ड: प्रयाति महिमानम्।।

(इन्द्रवज्रा / उपेन्द्रवज्रा / गीति:)

**तृतीय: विभाग: – स्थूलवाचनम्।**

**(गद्यम् – अवबोधनम्, पृथक्करणम्)**

**3. गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।**

**अ. अवबोधनम्।**

i. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत। **(1)**
वस्तुत: चित्रकला ईश्वरदत्ता कला नास्ति।

ii. एकपदेन उत्तरं लिखत।
चित्रस्य महत्त्वपूर्णमङ्गं किम् अस्ति? **(1)**

चित्रे भावानां रसानां च चित्रणं कथं विधेयमिति ज्ञापयितुं चित्रलक्षणानि कथितानि । व्यक्तिप्रकृतिमनुसृत्यापि चित्रं कथमारेखनीयमिति सङ्केता: वर्णिता: विद्दन्ते। यथा शान्तप्रकृतिमनुजस्य चित्रणसमये भ्रू: अर्धचन्द्राकारा भवेत्। नर्तकस्य भ्रू: धनुराकारा भवेत्। देवतानां चित्रं भूषणैरलङ् कृतं प्रसन्नमुखं धृतक्षौमं चालिखेत्। ऋषिचित्रणं जटाजूटयुक्तं कृष्णाजिनधारि दुर्बलं तेजोयुक्तं चावश्यकम्। चित्रस्य महत्वपूर्णमङ्गं लावण्यम्। चित्रकारेण अङ्गप्रत्यङ्गस्य प्रमाणं ज्ञात्वा कस्मिन् अङ्गे क्षय: आवश्यक: कस्मिन् अङ्गे वृद्धिरनिवार्या इति चिन्तनीयम्। इत्थं चित्रकारनैपुण्यार्थं यद् यदावश्यकं तत्सर्वमार्गदर्शनं श्रीविष्णुधर्मोत्तरपुराणे कृतं विद्दते। वस्तुत: तु कला ईश्वरदत्ता। परं तस्यां नैपुण्यप्राप्ति: मानवाधीना एव। तदर्थमेव शास्त्राणां प्रयोजनं शास्त्राध्ययनस्य उपयुक्तत्वं विद्दते।

**ब. पृथक्करणम्। स्तम्भमेलनं कुरुत।** **(2)**

| | | |
|---|---|---|
| i. | शान्तप्रकृतिमनुजस्य भ्रू: | तेजोयुक्तम् |
| ii. | नर्तकस्य भ्रू: | अर्धचन्द्राकारा |
| iii. | देवतानां चित्रम् | प्रसन्नमुखम् |
| iv. | महर्षिचित्रणम् | धनुराकारा |

**चतुर्थ: विभाग: – लेखनकौशलम्।**

**4.** **यथानिर्देशं कृती: कुरुत। (केवलं 3 उपप्रश्ना: लेखनीया:।)**

**अ.** **परिच्छेदपूर्ति:** **(5)**

**मञ्जूषात: उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत।**

शब्दानां माधुर्यं स्वर्गं प्रापयति कटुता च नरके पातयति। एक एव शब्द: जीवनं _______ उतान्य: शब्द: जीवनं नाशयेत्। एकदा द्वयो: धनिनो: मध्ये विवाद: उत्पन्न:। तौ _______ गतौ। तयोरेक: अचिन्तयदहं लक्षं रूप्यकाणि स्यूते स्थापयित्वा न्यायाधीशस्य गृहं गतवान्। न्यायाधीशस्तस्य _______ ज्ञात्वा क्रुद्धोऽभवत्। धनिकोऽवदत् भो:, मत्सदृशा: लक्षरूप्यकाणां दातार: दुर्लभा: एव। न्यायाधीश: अवदत्, लक्षरूप्यकाणां दातार: कदाचिदन्येऽपि भवेयु: परं लक्षरूप्यकाणां _______ मत्सदृशा: अन्ये विरला एव। अत: कृपया गच्छतु। न्यायस्थानं _______ मा कुरु। लज्जित: धनिक: धनस्यूतं गृहीत्वा तत: निर्गत:।

(न्यायालयं, निराकर्तार:, मलिनं, विभूषयेत्, मन्तव्यं)

**ब.** **निबन्धलेखनम्।** **(5)**

**3 पर्यायेषु 1 विषयम् अधिकृत्य 5 वाक्यात्मकं निबन्धं लिखत।**

- कृषीवल:
- गणेशोत्सव:
- आकाशवाणी।

**क.** **संस्कृतानुवाद:।** **(5)**

**8 वाक्येषु 5 वाक्यानां संस्कृतभाषया अनुवादं कुरुत।**

i. आयुर्वेदाचे आठ विभाग आहेत.
There are eight sections of Ayurveda.
आयुर्वेद के आठ विभाग है।

ii. आता रेल्वेचे आरक्षण करणे सोपे झाले आहे.
Now railway reservation has become easy.
अब रेल का आरक्षण करना आसान हुआ है।

iii. ढग पाऊस पाडतात.
Clouds rain.
बादल बरसते हैं।

iv. वार्ताहाराचे मुख्य काम बातम्या गोळा करणे.
The main job of the news reporter is to collect the news.
वार्ताहर का मुख्य काम वार्ताएँ/खबरें प्राप्त करना है।

v. तू ती बातमी वाचलीस का?
Have you read that news?
क्या तुमने वह खबर पढी?

vi. तुझ्या भावाचे नाव सांग.
Tell your brother's name.
अपने भाई का नाम बता।

vii. सिंह पशूंचा राजा आहे.
Lion is the King of beasts.
सिंह पशुओं का राजा है।

viii. वाघ गवत आणि झाडांची पाने खात नाही.
Tigers do not eat grass and the tree leaves.
बाघ घास और पेड के पत्ते नहीं खाता।

ड. **वाक्यरचना।**

**i. धातूनां प्रयोगः - चतुर्षु धातुषु 3 धातून् प्रयुज्य 3 वाक्यानि संस्कृतभाषया लिखत।** **(3)**

1. याच् – 1 आ. प.
2. स्पृह् – 10 उ. प.
3. रक्ष् – 1 प. प.
4. स्निह् – ४ प. प.

**ii. अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु 4 वाक्येषु 2 वाक्ययोः अशुद्धिसंशोधनं कुरुत।** **(2)**

1. नगरस्य उभयतः क्षेत्राणि सन्ति।
2. जलाय विना जीवनम् अशक्यम्।
3. नगरः बहिः उद्यानं वर्तते।
4. हर्षदा चित्रकलायै प्रवीणा।

## पञ्चमः विभागः – व्याकरणम्।
**(उपयोजनकौशलम्)**

**5. यथानिर्देशं कृतीः कुरुत।** (केवलं 5 उपप्रश्नाः लेखनीयाः)

अ. **क्रियापदरूपैः आवलिपूरणम् ।** (8 पर्यायेषु 6 पर्यायाः लेखनीयाः) **(3)**

(सर्वाणि रूपाणि तृतीयपुरुष-एकवचनस्य लेखनीयानि।)

| धातुः | द्वितीयभविष्यत्कालः | परोक्षभूतकालः | वर्तमानकालः | प्रथमभूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| भाष् –1आ.प. | _______ | बभाषे | _______ | अभाषत | _______ | _______ |
| दा – ३ प.प. | _______ | _______ | ददाति | _______ | _______ | दद्यात् |

ब. **नाम + सर्वनाम्नां रूपैः आवलिपूरणम् ।** **(3)**

(8 पर्यायेषु 6 पर्यायाः लेखनीयाः।)

| विभक्तिः Case | एकवचनम् Singular | द्विवचनम् Dual | बहुवचनम् Plural |
|---|---|---|---|
| तृतीया Instrumental | शशिना | _______ | _______ |
| पंचमी Ablative | _______ | _______ | सर्वाभ्यः |
| षष्ठी Genitive | चन्द्रमसः | _______ | _______ |
| प्रथमा Nominative | _______ | आवाम् | _______ |

क. **धातुसाधितविशेषणैः कोष्ठकपूर्तिः।** **(3)**

(8 पर्यायेषु 6 पर्यायाः लेखनीयाः।)

| कर्म. भू. धा. वि. Past Passive Participle | कर्म. वि. धा. वि. Potential Passive Participle | कर्त. भू. धा. वि. Past Active Participle | कर्त. व. का. धा. वि. Present Active Participle |
|---|---|---|---|
| | | | |
| | | | |

(विराजमानम्, प्रेषितः, गमनीयः, निवर्तमानः, पठिता, स्मर्तव्यम्, प्रेरितवान्, प्राप्तवती

ड. **समासाः।** (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) **(3)**

कृती-समस्तपदानां समासनामभिः सह मेलनम्।

| | समासः | समासनाम |
|---|---|---|
| i. | सोल्लासम् | उपपद तत्पुरुषः। |
| ii. | देहजः | क्रियाविशेषण सह बहुव्रीहिः। |
| iii. | अहर्निशम् | अव्ययीभावः। |
| iv. | प्रतिदिनम् | समाहार द्वन्द्व :। |
| v. | पर्णाविशेषात् | कर्मधारयः। |
| vi. | महावृक्षाः | षष्ठी तत्पुरुषः। |
| vii. | तपोधनः | नञ् तत्पुरुषः। |
| viii. | अनिच्छया | बहुव्रीहिः। |

**इ. वाक्यपरिवर्तनम्।** (4 पर्यायेषु 3 पर्यायाः लेखनीयाः) **(3)**

i. तेन धनिकेन सत्वरं सेवकः प्रेषितः। (प्रयोगपरिवर्तनं कुरुत।) (Change the voice.) (प्रयोग बदलिए।)

ii. नष्टे कारणे कुतः कार्योत्पत्तिः। (यदि - तर्हि उपयुज्य वाक्यं पुनर्लिखत।)
(Use यदि - तर्हि and rewrite the sentence.) (यदि - तर्हि का प्रयोग कीजिए।)

iii. राष्ट्रध्वजः मां कीर्तिकथाः स्मारयते। (कर्तृस्थाने अहम् उपयुज्य वाक्यं पुनर्लिखत।)
(Rewrite the sentence using अहम् as the subject.) (प्रयोजक हटाइए।)

iv. भवान् प्रभाते पद्भ्यामागच्छतु। (भवान् इत्यस्त स्थाने त्वम् उपयुज्य वाक्यं पुनर्लिखत।)
(Rewrite the sentence using त्वम् in place of भवान्) ('भवान्' के स्थान पर 'त्वम्' का प्रयोग कीजिए।)

**फ. सङ्ख्यावाचकाः। रिक्तस्थानपूर्तिः।** (4 पर्यायेषु 3 पर्यायाः लेखनीयाः।) **(3)**

i. _______ एताः समिधः श्रियः। (७/7)

ii. भगवद्गीतायाः _______ अध्यायाः सन्ति। (१८/18)

iii. देवक्याः _______ अपत्यं नाम भगवान् श्रीकृष्णः। (८, 8th/ आठवा)

iv. मया _______ अपि विदेशयात्रा न कृता। (१ / Once / एक बार)

**षष्ठः विभागः – अनुवादकौशलम्।**

**6. अ. संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत।** **(4)**

'अग्नेः पक्षाः' नाम्नि आत्मचरित्रे भूतपूर्वः राष्ट्रपतिः भारतरत्न डॉ. कलाममहोदयः लिखति, ''स एव फलदायी नायकः य सामर्थ्यवतां जनानां सङ्ग्रहणं कर्तु शक्नोति। स निरन्तरं सङ्घटने नूतनं रक्तं युञ्जीत। समस्यानां समाधानकरणे तथा नूतनकल्पनानां क्रियान्वयने स प्रवीणः स्यात्। स्वस्य गणे उत्साहं पूरीयितुं स समर्थः स्यात्। यत्र यावद् आवश्यकं तत्र तावच्छ्रेयः स इतरेभ्यः द्द्यात्। सार्वजनिकतया तेषां प्रशंसा स कुर्यात किन्तु दोषविमर्शनम् एकान्ते एव कुर्यात्।

**ब. संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** **(4)**

करावािव शरीरस्य नेत्रयोरिव पक्ष्मणी।
अविचार्य प्रियं कुर्यात् तन्मित्रं मित्रमुच्यते।।
शत्रुभावस्थितान् यस्तु करोति वशवर्तिनः।
प्रज्ञाप्रयोगसामर्थ्यात् स शूरो स च पण्डितः।।

**क. संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** **(4)**

| | | |
|---|---|---|
| **शर्विलकः** | - | मदनिके ! समाश्वसिहि। |
| **मदनिका** | - | (समाश्वस्य) साहसिक ! न खलु त्वया मम कारणादिदमकार्यं कुर्वता तस्मिन् गेहे कोऽपि व्यापादितः परिक्षतो वा ? |
| **शर्विलकः** | - | मदनिके ! भीते सुप्ते शर्विलकः न प्रहरति। तन्मया न कश्चिद् व्यापादितो नापि परिक्षतः। |
| **मदनिका** | - | प्रियं प्रियम्। |
| **शर्विलकः** | - | आः दुरात्मन् चारुदत्तहतक। अयं न भवसि। |

(मृच्छकटिकम् )